International Journal of Applied Research 2019; 5(1): 419-422




**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2019; 5(1): 419-422
www.allresearchjournal.com
Received: 21-11-2018
Accepted: 24-12-2018

**डॉ0 ब्रजेश कुमार मिश्रः**
तुमौल, पुतइ, मण्डलम्–दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ0 ब्रजेश कुमार मिश्रः**
तुमौल, पुतइ, मण्डलम्–दरभंगा, बिहार, भारत

# द्वादशभावात् विचारणीयविषयाः

**डॉ0 ब्रजेश कुमार मिश्रः**

**प्रस्तावना**

तन्वादि द्वादशभावजातकताजिकयोः प्राणतत्वं यैर्विना शुभाशुभफलविवेचनं न भवितुमर्हति। अतः द्वादशभावात् किं–किं विचारणीयविषयः वर्त्तते तस्य विषयस्य विवेचनमत्रोपस्थाप्यते–

*शरीरवर्ण चिह्नय वयोमानं सुखासुखम्।*
*जाति शीलञ्च मतिमाल्लग्नात् सर्वं विचिन्तयेत्।*[1]

सर्वप्रथमं ताजिकग्रन्थकर्त्तुः नीलकण्ठाचार्यस्य मतमेतादृशं प्राप्यते– शरीरः, वर्णः (श्यामगौरनीलपीतादि), चिह्नं, आयुर्दाय, वयसः सुख–दुःखं जातिशीत्वं (आचारं) एषां सर्वेषा शुभाशुभत्वविचारः विद्वभिः लग्नात् करणीयमिति।

**महर्षि पराशरस्योक्तिः प्रथमभावस्य विषयाः सन्ति**– तनरूपज्ञानवर्णबलाबलं प्रकृतिसुखदुः खंञ्च।[2] मूर्त्तिरायुः कीर्त्ति स्थितिः स्वरूपं सम्पतीनां सम्यक् प्रकारेण विमर्शः प्रथम भावात् करणीयमिति।[3] अत्रैव जीवनाथमहाभागस्य वचनमेतादृशं परिलक्षितम् यथा– जीवनाथः कथयति यत् प्रथमभावात् जातिरायसुखदुःखं चिह्नवर्णज्ञानं निद्रा स्थानानां विमर्शः करणीयमिति।[4]

श्री वराहस्य पुत्रेण पृथुयशमहाभागेन लिखितस्य ग्रन्थस्य टीकाकारः दीनानाथ महोदयेन प्रथमभावात् विचारणीयविषयं एतादृशं निगदितम्– दीनानाथमहोदयः कथयति यत् प्रथमभावात् शीरवर्णयशचिह्नयुवय जातिशील (आचार) विश्रामं गुणरूपसुखदुःखं एतेषां सर्वेषां विचारं विद्वद्भिः कर्त्तव्यः।[5]

अत्र विषयेऽस्मिन् दैवज्ञवैद्यनाथेन एतादृशं वचनं प्राप्यते, यथा–

*शरीरवर्णाकृति लक्षणानि यशोगुणस्थान सुखासुखानि।*
*प्रवासतेजोबलदुर्बलानि फलानि लग्नस्य वदन्ति सन्तः।*[6]

देवकीनन्दनसिंहस्य भावना विचारणां सम्बन्धे एतादृशं परिलक्ष्यते– ''शरीरवर्णाकृति–गुणयशस्थानसुखदुः खप्रवासक्षीणातारूपलक्षणतेजाना'' विचारः प्रथम– भावात् भवति। अनेन प्रकारेणैतद्विषये जातकताजिकयोः समैव रूपेण प्रतिपादन भवति। द्वादशभावात् विचारणीय विषये किंचित्मेवान्तरं परिलक्ष्यते विदुषां मते। लग्नभावः सर्वतोभावेन ताज (मुकुटमणि) विद्यते।

नेमिचन्दशास्त्रिमहानुभावेन इत्थं विचारणीयविषयाः– स कथयति यत् प्रथमभावात् तनरूपचिह्नजातिरायुसुखदःख विवकेशीलता मस्तिष्कस्वभावाकृतीनां विचारः भवति।[7]

आचार्यभास्करानन्दलोहनी महानुभावस्य मतमेतादृशं परिलक्ष्यते– ''तनवर्णचिह्न– युराकारसुखदुः खंशीलाचरणं अवस्थाशिरनैरूज्यता पितामह्यां मातामह्यानां विचारः करणीयमिति।[8] मन्त्रेष्वरमहाभागस्य विचारः विषयेऽस्मिन् एतादृशं वर्तते, यथा– लग्नहोराकल्पदेहोदयरूपशीर्षवर्त्तमानकालसहितं जन्मसंबंधि विचारं प्रथम भावादेव करणीयमिति।[9]

**द्वितीय (धन) भावात् विचारणीयविषया नीलकण्ठाचार्य, द्वितीयभावात् विचारणीयविषये निगदति, यथा–**

*''सुवर्णरूप्यरत्नानि धातुद्रव्यं सखाधने''*[10]

अर्थात् सुवर्णरूप्यरत्नादीनां धातूनां द्रव्यादि (कांसपित्तलादि) सखाविचारं द्वितीयधनभावात् करणीयमिति। महर्षि पराशरस्यवचनमेतादृशं प्राप्यते– कुटुम्बधनधान्यमृप्युशत्रुरत्नादिधातूनां विचारः धनभावस्य विषयः।[11]

अस्य विषये जीवनाथमहाभागस्य वचनं एतादृशं प्राप्यते– ''स्वर्णरजदमुत्युदिरत्नानां– क्रयविक्रयश्चेति'' विचारः धनभावस्य विषयोस्ति।[12] दैवज्ञ वैद्यनाथमहाभागेन धनभावस्य किं–किं विचारमिति विषये इत्थं वचनं निगदितम्–

*''वित्तं नेत्रं मुखं विद्यावाककुटुम्बाशनानि च।*
*द्वितीय स्थान जन्यानि क्रमात् ज्योतिर्विदो विदुः।*[13]

अनेन प्रकारेण ताजिकजातकयोः दैवज्ञयोः धनभावात् विचारविषयाः प्राप्यन्ते। श्री बेंकटेश्वरदैवज्ञेनापि ''कुटुम्बमुखवाक्दक्षिण–नेत्रपूर्वार्चिधनं दासविद्यामुक्ति मित्राणां विचारः धनभावात् निगदितम्।''[14]
सामान्यतः धनभावस्य विचारणीय विषयः भावसंज्ञकेनाधरे एव भवितष्यमिति किन्तु मारकेशस्यापि विचारः अपि अत्रतः एव भवति। मुखवाक्दक्षिणनेत्राणां सहितं रत्नानां धातूनां च विचारोऽपि धनभावस्य एवं विषयोस्ति। ताजिके भावफलविषयकं विचारं वर्षप्रवेशाधारे एव भवति। त्रैराशिक, मुन्थहा, वर्षेशवशात् भावफलस्य प्रवणाताः ग्रन्थान्तरे परिलक्षिता। जातक ग्रन्थेषु समान विचारः एव परिलक्ष्यते। अस्तु द्वितीय धनभावत् धनाप्तिविषयकः विचारः परिलक्षितः।

**तृतीयभावात् विचारणीयविषयाः–** ताजिकनीलकण्ठी नीलकण्ठाचार्यः तृतीयभावात् विचारणीय विषयम् एतादृशं वचनं निगदति–

*''विक्रमे भ्रातृ भृत्याध्व पित्र्यस्खलन साहसकम्''*[15]

महर्षि पराशरेण तृतीयभावात् विचारणीय विषयः निगदितम्– ''विक्रममृत्यभ्रात्युप– देशयात्रामातृ– पितृमृत्युः'' विचारविषयः तृतीय भावस्य। विषयेऽस्मिन् वराहमिहिराचार्यस्य वचनं एतादृशं शोभते–

''एहजविक्रमकंठसुधापात्रापात्राभरण''[16] विचारविषयः।

तृतीयभावस्य दैवज्ञ वैद्यनाथस्य भावना विषयेऽस्मिन् एतादृशी परिलक्षिता–

ज्येष्ठानुजस्थितिपराक्रमसाहसानि कण्ठस्वरश्रुतिवराभरणांशुकानि। धैर्यं च बीर्यबलमूलफलाशनानि वक्ष्ये तृतीयभवनात् क्रमशोऽखिलानि।[17] तृतीयस्यान– मायुस्थानसंज्ञकम्। आयु विचारः अस्य स्थानस्य विषयः।

**चतुर्थभावात् विचारणीयविषयाः –** नीलकण्ठाचार्यमहानुभावः चतुर्थभावात् विचारणीयविषये एनं विचारं निगदति– *''पितृवित्तं निधिः क्षेत्रं गृहं भूमिश्च तूर्यतः''*[18]
पितुः धनं, भूमौ क्षिप्तं धनं, कृषिवाणिज्यकर्मं, गृहभूमिवाहनादि विचारमपि चतुर्थ भवनात् भवति। सुखभवसंज्ञकं चतुर्थभावः। मातृभावत्वात् अस्य स्थानस्य केन्द्रत्वाच्च विशेषस्थानं वर्त्तते।
महर्षिपराशरस्य वाक्यमप्यवलोकनीयमिति यथा–
''बन्धुबान्धववाहनमातृसुखं निधिभूमगृहवाटिकायाः''[19] विचार विषयः चतुर्थभावस्य वर्त्तते। आदित्यदासतनयः दैवज्ञेष्वग्रगण्यः जातकस्य पुरोधा वराहमिहिराचार्यस्य वचनं चतुर्थभाव विषये एतादृशां वर्त्तते–
''मातृवाहनबन्धुसुखसिंहासनगृहमित्रवाहू'' विचारविषयः चतुर्थभावस्य। दैवज्ञवैद्यनाथस्य वचनं एतादृशं प्राप्यते–

*वदन्तिविद्याजननीसुखानि सुगन्धगोबन्धुमनोगुणानि।*
*महीपयानक्षिति मन्दिराणि चतुर्थभावप्रभानि तज्ज्ञाः।*[20]

एवं प्रकारेण जातकज्ञा ताजिकज्ञाश्च चतुर्थभावात् विचारणीयविषये निगदन्ति।

**पञ्चमभावात् विचारणीयविषयाः–** तजिककर्त्तुः नीलकण्ठाचार्यस्य वचनं पंचमभावात् विचारणीयविषये एतादृशं वर्त्तते। तेन निगदितम्– *''पुत्रेमन्त्रधनो– पायगीर्भविद्यात्मजेक्षणम्''* मन्त्र–दीक्षा धनोपायः, गर्भ–विद्यापुत्रपुत्रीणां विचार विषयः पंचम भावस्य। पंचमभावः त्रिकोणसंज्ञकः वर्त्तते। भावस्यास्य जातके ताजिकेऽपि च अत्यधिकं महत्वं वर्त्तते यतः– दीक्षामन्त्रप्रकाशनत्वात्। महर्षि पराशरः अस्य भावस्य विचारणीय विषये इत्थं वचनं निगदति–

*''यन्त्रमन्त्रविद्याबुद्धिवैभवपुत्रराज्यापभ्रंशविषयकश्च''*[21]

**पंचमभावस्य श्रीमद्बराहस्य विचारमेतादृशं शोभते–** ''पुत्रवृद्धिमन्त्रदेवभक्ति– हृदयमातुलानां'' विचार–पंचमभावस्य विषयः। दैवज्ञवैद्यनाथेन अस्मिन् विषये वचनमेतादृशं प्राप्यते–

*पुत्राद्देवमहीपपुत्रपितृधीपुण्यानि संचितये–*
*दयात्रामस्तसुतस्व कर्मभवनैर्दूराटनं निष्फतः।*
*लग्नाद्रन्ध्र दिनेशतः पितृसुखं जीवात्मजस्थानतः*
*पुत्रप्राप्तिरनद्रगवित्तपसितैः स्त्रीसम्पदश्चिन्तयेत्।*[22]

अराध्यदेवता, राज्ययोगः, सन्तानः, पिता, बुद्धिः, पुण्यं, सुकर्मं एतानि पञ्चम भावतः चिन्तयेत्।

**षष्ठभावात् विचारणीयविषयाः** श्रीमद्नीलकण्ठाचार्य महानुभावः षष्ठभावात् संबंधित विषयाणां विचारं निगदति–

*''रिपौमातुलमान्द्यारिचितुषदबन्धनभीर्व्रणान्''*[23]

महर्षि पराशरः कथयति यत् षष्ठभवात् मातुलमृत्युशंकाशत्रुब्रणादिकं विचार विषयोऽस्ति। अत्रैवाऽस्मिन् विषये बराहस्य वचनमवलोकनीयमिति यथा– ''रिपुजातिबलव्याधिउदरशत्रूणां'' विचारः विषयः षष्ठ भावस्य। श्रीमद्जीवनाथमहाभागस्य वचनमेतादृशं अस्मिन् विषये यथा– ''शत्रुचतुष्पदब्रणव्याधिभययुद्धानां'' एतानि विषयाणि सन्ति षष्ठभावस्य।
वैदज्ञवैद्यनाथमहाभागेन षष्ठभाव विषयकं विचारे एतादृशं वचनं निगदितम्–

*रोगारिव्यसपक्षतानि वसुधापुत्रारितश्चिन्तये–*
*दुक्तं रोगकरं तदेव रिपुगे जीवे जितारिर्भवेत्।*[24]

रोगः, शत्रु, दुराचरणं, व्रणाधातं वसुधापुत्रारितः अनति षष्ठभावतः चिन्तयेत्

**सप्तमभावात्विचारणीयविषयाः–** सर्वप्रथमं अस्य भावस्य विचारणीय विषये श्रीमद्नीलकण्ठाचार्यस्य वचनमु परस्थाप्यते–

*दयूने अलत्र वाणिज्य नष्ट विस्मृति संकथा।*
*हृताध्व कालिभार्गादि चिन्त्यं दयूने ग्रहोऽशुभः।*[25]

स्वीवाणिज्य (व्यापार) नष्टवस्तु, विस्मृतिः हृताध्व (चौर्येणापहरणस्थ ज्ञानं), कलहं, यात्रा एतानि विषयाणि सप्तम भावस्य सन्ति। भावोऽयं जाया शब्देन संज्ञितं मारकस्यापि वोधकं सप्तमं जायाभावं। महर्षिपराशरेण एतादशं वचनं भणितम अस्य विचारणीय विषये यथा– ''जायाध्वप्रयाणपदाप्तिवाणिज्यात्मामृत्यु'' एतानि विषयाणि सन्ति विचारार्थम्।

**श्रीमद्बराहमिहिराचार्यस्यानुसारेण एतानि विषयाणि सन्ति विचारणियानि यथा–**
''कलत्रसुखभोगं छत्रदन्तंनाभिरोगं'' विचारं करणीयमिति। अत्रैव चण्डेश्वरस्य विचारमबलोकनीयमिति यथा– चण्डेश्वरः कथयति–

बस्तूनांक्रयः मुकदमाकामचेष्टादासदासीस्त्रीयात्राचौर बृत्ति''[26] एतानि विषयाणि सन्ति विचारर्थम्।

दैवज्ञ वैद्यनाथस्योक्तिः प्रषंसनीया यथा–
*यात्रा पुत्रकत्रसौख्यमखिलं संचिन्तयोसप्तमा–*
*छुक्तं सुखासुखागमफलं सर्वे च यत्तद्वदेत।।[27]*
जातकाभरणे यथा निगदितं तथैवोपस्थाप्यते–
*रणांगणं चापि वणिकक्रियाश्च जायाविचारागमनप्रयाणम्।*
*शास्त्रप्रवीणैर्हि विचारणीयं कलत्र (7) भावे किल सर्वमेतत्।।[28]*

अनेन प्रकारेण सप्तमभावस्य (जायाभावस्य) विचारणीयानि विषयाणि सन्ति। जायाभावात् मारकेशस्यापि विचारं भवति। सप्तमं स्थानोपरि सर्वेषां ग्रहाणां पूर्णदृष्टिः कथयन्ति जातकज्ञा ताजिकज्ञाश्चेति।

**अष्टमभावात् विचारणीयविषयाः–** अष्टमभाव विषये नीलकण्ठाचार्यस्य सम्मतमेतादृषं प्राप्यते यथा–

*मृत्यौ चिरन्तरं द्रव्यं मृतवित्तं रणोरिपु।*
*दुर्गस्थानं मृतिर्नष्टं परीवारों मनोव्यथा।[29]*

प्राचीनद्रव्यं, मृतस्यधंन, संग्राम, शत्रु, दुर्गस्थानं, मरणं, नष्टवस्तुः, कुटुम्बं तथा मानसिक व्यथाया विचारं अष्टमभावात् करणीयमिति। महर्षि मराशरेण संक्षिप्तरूपेण आयुमृत्युस्थानं ववासीरस्य विचारं निगदितम्।
वरामिहिराचार्यस्य सम्मतमस्मिन् विषये एतादृशं शोभते–
''गुदाजीवनमरणव्यापरं''[30] अष्टम भावस्य विचारणीय विषयाः सन्ति। दैवज्ञवैद्यनाथमहाभागस्य अष्टमभावात् विचारणीयविषये एतादृषं प्राप्तं भवति–

*आयुर्दायमनिष्टहेतुमुदय व्योमायुरीशार्कजै–*
*रुक्तं तत्सकलं तथापि निधनप्राप्ति प्रवक्ष्ये पुनः।।[31]*

**नवम (भाग्य धर्म) भावात् विचारणीयविषयाः–** भारतीयताजिकस्य पुरोधा नीलकण्ठाचार्यस्य विचारं नवमभावस्य विचारणीय विषये एतादृशं परिलक्ष्यते–*''धर्मेरतिस्तथा पन्था धर्मोपायं विचिन्तयेत्''[32]* रति क्रीड़ा भक्तिः वा यात्राधर्मक्रियोपायं नवमभावात् विचिन्तयेत् इति नीलकण्ठाचार्यः निगदति। महर्षि पराषरस्य अस्मिन् विषये– ''धर्मभाग्यश्यालः भ्रातृपत्नीतीर्थयात्रा'' एतानि विषयाणि नवमभावस्य सन्ति। जीवनाथदैवज्ञेन एतादृषं वचनं निगदितम्– देवालयजलाशयपुण्यतीर्थयात्रा सामान्यगमनं भाग्यं पित्तविशेषं वातव्याधि पौत्रपौत्रीविधि सम्पतिनेतृत्वञ्चैव विचारं नवमभावस्य विषयम् वर्तते।
अस्मिन् विषये दैवज्ञ वैद्यनाथस्य वचनमवलोकनीयमिति यथा–

*ाग्यप्रभावगुरूधर्मतपः शुभानि संचिन्तयेन्नरमदेव पुरोहिताभ्याम्।*
*भाग्येशदेवसचिवौ शुभवर्गयातौ भाग्ये शुभग्रहयुते समुपैतिभाग्यम्।।[33]*

**दशम (कर्मराज्य) भावात् विचारणीयविषयाः–** सर्वप्रथमं नीलकण्ठाचार्यस्य सम्मतं भावस्यैतस्य विचारणीय विषये एतादृशं वर्त्तते यथा–

*व्यौम्नि मुद्रा परं पुण्यं राज्यबुद्धि च पैतृकम्।[34]*

*''वराहमिहिराचार्यः कथयति यत् दशमभावात् ''मानराज्यकर्मकीर्तिव्यापारञ्च''[35] विचारं करणीयमिति।* दैवज्ञजीवनाथेन एतादृशं वचनम् अस्मिन् विषये निगदितम्– ''राजकुलातधनाप्तिः राज्यलाभः पितृभाग्यकार्यं सिद्धिजलवृष्टि''[36]। दैवज्ञ वैद्यनाथमहाभागेन एतादृशं वचनं अस्मिन्विषये भणितम्–

*आज्ञामानविभूषणानि वसनव्यापार निद्राकृषिः*
*प्रव्रज्यागमकर्मजीवनयशो विज्ञानविद्याः क्रमात्।*
*कर्मस्वामिदिनेश बोधन कुरूच्छायासुतैश्चिन्तये–*
*दुक्तानि प्रविहाय पूर्वमशुभेमानीविमानों भवेत्।।[37]*

**एकादशभावात् (आयभावात्) विचारणीयविषयाः –** आये सर्वार्थधान्यार्ध– कन्यामत्रचतुष्पदा। राजो वित्तं परीवारो लाभोपायांश्च भूरिशिः।[38] इति नीलकण्ठाचायः निगदति यत् एकादशभावात् विचिन्त्यनीयमिति। पराशरस्योक्तिरेतादृशी परिलक्षिता। महर्षि निगदति यत् एकादश भावात् अनेकप्रकाराणां वस्तूनामुत्पतिः, पुत्र, जायाआय पशुसमृद्धेश्च विचारं करणीयमिति। फलदीपिकाकारेण श्री[39] मन्त्रेश्वरेण अस्मिन्विषये स्वकीया एतादृशी भावना निगदिता यथ– लाभ, आयः, आगमनं, आप्तिः सिद्धि विभवः श्लाध्यता, प्रशंसा, अग्रजः अग्रजा, वामकर्णः सरसता सन्तोषः सुसमाचारस्य येति विचारः एकादश भावस्य विषयोऽस्ति। आचार्य भास्करानन्द लोहनी महाभागस्य चिन्तनमेतादृश शोभते– अर्थलाभं, सन्तानहीनता, कन्याप्ति, पत्र, भार्या, पुत्रनाशः, वामकर्णः, वामपाणिः विद्यालाभः अग्रजानां च विचारः एकादश भावस्य विषयोऽस्ति।

**द्वादश (व्यय) भावात् विचारणीयो विषयाः –** द्वादश (व्यय) भावात् विचारणीय विषय प्रसंगे श्री नीलकण्ठाचार्यस्य वचनमेतादृशं प्राप्त भवति यथा–

*व्यये वैरि निरोधार्त्ति व्ययादि परिचिन्तयेत्।[40]*
*वैरिकृतान्तव्यय मृत्योश्च विचारं व्ययभावात् करणीयमिति।।*

बराहमिहिराचार्यस्य भावना अस्मिन् विषये एतादृशी प्राप्ता, यथा– ''पितृधनवाद– विवादकमनेत्रवणिजकर्मञ्च''[41] विचारं व्यवभावात् भवति। मन्त्रेष्वरमहानुभावस्य वचनं अस्मिन् विषये एतादृशं वर्त्तते– ''[42] दुःखडि.घ्र वामनयनंक्षय– दारिद्रपापशयनव्ययबन्धनञ्चेति'' विचारः व्ययभावात् विचिन्तयेत्
जीवननाथमहानुभावस्य वचनमुपस्थाप्यते– दानकर्मणिसदव्यय इष्टापेक्ष, शत्रुस्तम्भनोपायः शिविका वाहनस्य च विचारं व्ययभावात् करणीयमिति। अस्मिन् विषये दैवज्ञ वैद्यनाथेन् एतादृशं वचनं प्राप्यते, यथा– लग्नादन्त्यतदीशभानुतनयैर्दूराटनं दुर्गतिं दातृत्वं शयनादि सौख्यविभवं वित्तक्षयं चिन्तयेत्।[43] प्रकारेणानेन तन्वादिद्वादशभावानां विचारणीय विषयाः वर्णिताः सन्ति शास्त्रान्तरे।

**संदर्भाः–**


1. ता0 नीलकण्ठी ग्रहाध्याय– 1 श्लो0 28।
2. ता0 नीलकण्ठी श्लो0 49 ग्र0रा0स्वरू0अ0 1।
3. बृ0पा0हो0शा0भा0 विवेचनरस्याम् श्लो0 2।
4. लघुजातक पृ0 118।
5. भावप्रकाश, भावफला अ0।
6. षट्पंचाशिका पृ0 55।
7. जतकपारिजात भावफला अ0 श्लो0 13।
8. ज्योतिंष रत्नाकर पृ0 148।
9. भारतीय ज्योतिष पृ0 220।
10. ज्योतिष नवनीत पृ0 139।
11. फलदीपिका प्र0 प्र0 श्लो0 11।
12. नीलकण्ठी पृ0 44।
13. बृ0पा0हो0शा0 भावविवेचनाध्याय श्लो0 3।
14. जातकपारिजात भा0 नि0 श्लो0 49।
15. सर्वार्थचिन्तामणि अ0 3, श्लो0 3।
16. ता0 नीलकण्ठी ग्र0रा0स्व0अ0पृ0 44।
17. वृ0पा0हो0शा0 भावविवे0 अ0 श्लो0 4।
18. लघुलातक पृ0 118।
19. जातकपा0 तृतीयभाव अ0 श्लो0 1।
20. ता0 नीलकण्ठीग्र रा0श्व0अ0 1, श्लो0 51।

21. लघुजातकम् पृ0 118।
22. जातक पारिजात च0भा0फ0अ0 12, श्लो0 59।
23. ग्र0रा0स्व0अ0 1 श्लो0 52।
24. ता0 नीलकण्ठी ग्र0रा0स्व0अ0 1, श्लो0 51।
25. वृ0पा0हो0शा0पं0भा0श्लो0 6।
26. लघुजातकम् पृ0 119 भा0वि0अ0।
27. जा0पा0पं0अ0 13, श्लो0।
28. ता0नी0क0ग्र0रा0स्व0अ0 1, श्लो0 52।
29. वृ0पा0हो0शा0 (भा0वि0अ0) श्लो0 7।
30. लघुजातकम् पृ0 119।
31. जातक0 पा0 भा0 फ0 अ0 1।
32. जातक0 पा0 भा0 श्लो0 71।
33. ता0 नीलकण्ठी ग्र0 रा0 स्व0 अ0 12, श्लो0 52।
34. वृ0 पा0 हो0 शा0 पं0 भा0 श्लो0 8।
35. लघुजातकम् पृ0 139।
36. वर्षफलविचार पृ0 139।
37. जातक पा0 अ0 14, श्लो0 1/2।
38. जातक पा0 अन्तर्गत जातकभरणम्।
39. ता0 नीलकण्ठी अ0 1, श्लो0 53।
40. लघुजातकम् पृ0 119।
41. जतक पा0 अ0 14 अ0भा0फ0श्लो0 48।
42. त0 नीलकण्ठी अ0 1 श्लो0 554 ग्र0 रा0 स्व0 अ0।
43. वृ0 पा0 हो0 शा0 भा0 वि0 अ0 श्लो0 10